CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

SC
10/7/21

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

॥ भुजंग प्रयात छन्द ॥

नमामीशमीशान निर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपं।
निजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेहं॥
निराकारमोंकारमूलं तुरीयं गिराज्ञानगोतीतमीशं गिरीशं।
करालं महाकालकालं कृपालं गुणागारसंसारपारं नतोहं॥
तुषाराद्रिसंकाशगौरं गंभीरं मनोभूतकोटिप्रभासीशरीरं।
स्फुरन्मौलिकल्लोलिनीचारुगंगा लसद्भालबालेन्दुकंठेभुजंगा।
चलत्कुंडलंशुभ्रनेत्रंविशालं प्रसन्नाननंनीलकंठंदयालं।
मृगाधीशचर्माम्बरंमुंडमालं प्रियंशंकरंसर्वनाथं भजामि।
प्रचंडंप्रकृष्टंप्रगल्भंपरेशं अखंडंअजंभानुकोटिप्रकाशं।
त्रयःशूलनिर्मूलनंशूलपाणिं भजेहंभवानीपतिंभावगम्यं।
कलातीतकल्याणकल्पान्तकारी सदासज्जनानंददातापुरारी।
चिदानंदसंदोहमोहापहारी प्रसीद प्रसीदप्रभो मन्मथारी॥

यावतजन्मनाथपादारविंदं।
विस्मरामानाथपादारविंदं भजंतीहलोके परेवानराणाम्
तावत सुखं शांति सन्तापनाशं।
प्रसीद प्रभोसर्वभूतादिनाशं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नजानामियोगंजपं नैव पूजां नतोहं सदासर्वद
जराजन्मदुःखौघताप्यमानं प्रभोपाहिआपन्न

श्लोक-रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष
ये पठन्ति नराभक्त्या. तेषां शम्भुः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ सूचीपत्र ॥

विषय	=	पृष्ठ	विषय	=	पृष्ठ
मस्मरणम्	=	१	गौरीशाष्टकम्	=	२८
ण्डलुशुद्धमंत्र	=	२	देव्यपराधक्षमापनस्तोत्रम्	=	३१
मंत्र "	=	२	फुटकर श्लोक	=	३४
क्रिया "	=	३	गणपतिस्तोत्रम्	=	३५
स्नानाम् "	=	३	आत्मचिन्तनम्	=	३६
र्पणम् "	=	३	गुरु आरति	=	३८
दानमस्कार "	=	३			
पालनमस्कार	=	४			
यनमस्कार	=	४			
शान्ति पाठ	=	५			
करणम्	=	८			
वास्योपनिषद्	=	११			
क्योपनिषद्	=	१८			
महात्म्यम्	=	२१			
श्लोकी गीता	=	२८			

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ब्रह्म मुहूर्ते बुद्ध्वा ब्रह्मात्म स्मरणम् ॥

ॐ प्रातः स्मरामि हृदि संस्फुर दात्म तत्त्वं
सच्चित्सुखं परम हंस गतिं तुरीयम् ॥
यत्स्वप्न जागर सुषुप्तमवैति नित्यं, तद ब्रह्म
निष्कल महं न च भूत सङ्घः ॥ १ ॥
प्रात र्भजामि मनसो वच साय गम्यं, बाचो
विभान्ति निखिला यद नुग्रहेण ॥
यन्नेति नेति वचनै र्निगमा अवो चुस्तं -
देव देव मज मच्युत माहु रग्र्यम् ॥ २ ॥
प्रात र्नमामि तमसः पर मर्क वर्णम्
पूर्णं सनातन पदं पुरुषोत्त माख्यम् ॥
यस्मि न्निदं जगद शेष मशेष मूर्तौ
रज्वां भुजंगम इव प्रति भासि तं वै ॥ ३ ॥
श्लोक त्रय मिदं पुण्यं लोक त्रय विभूषितम् ।
प्रातः काले पठे द्यस्तु स गच्छे त्परमं पदम् ॥ ४ ॥

॥ समाप्त ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ कमंडलु शुद्धिः मंत्रः ॥

ॐ जले अग्निः करे अग्नि ब्रह्माग्निश्चा-
पिसंनिधौ ॥ अग्नित्रय प्रसादेन शुद्धौ भव
कमण्डलो ॥ १ ॥

कमण्डलु महा तीर्थ त्रिवेणी संगमोद्भव ।
महा नद महा तीर्थ पुण्योदक परायणः ॥ २ ॥

अगस्त्यादि मुनि श्रेष्ठ धृतोसि त्वं कमण्ड-
लो =
स्नान सन्ध्यादि शौचेषु त्वमेव कारणं मम ॥ ३ ॥

देव पूजा तथा शौचं भोजनं च तथैव च ।
यति मृन्मय पात्रेण सर्व कर्माणि कारयेत् ॥ ४ ॥

॥ क्षौरं ॥

कृता वृतौ यतेः क्षौरं पक्षे पक्षे च यज्वनाम्
मासि मासि गृहस्थानां यथे येच्छं ब्रह्मचारिणः ॥

ॐ महा पापोप पापाभ्यां केशश्मश्रुनखादिषु ।
क्षौरस्नानादिभिः सर्वे ते मे दोषा व्रजन्त्वधः ॥

ॐ तत्सत्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ दंडक्रिया ॥

ॐ उत्तिष्ठोत्तिष्ठ भगवन्नारायण जगत्पते।
दंडरूपिन्महाविष्णो प्रासीद पुरुषोत्तम ॥१॥
ॐ आगच्छ देव देवेश शंख-चक्रगदाधर।
गृहणास्मत्कृतां पूजां दंडेस्मिन् संनिधौ भव ॥२॥

॥ अथ दंडस्नानम् ॥

आदौ मूले तथा चाग्रे मध्ये द्वादश वारिणा।
त्रीणि त्रीणि च ग्रन्थेषु पर्व मध्ये द्विवारतः ॥१॥

॥ अथ दंड तर्पणम् ॥

सुरास्तिष्ठन्ति दंडाग्रे दंडमूले तु पूर्वजाः।
प्रति ग्रन्थिषु गंधर्वा मध्ये तिष्ठन्तु मानवाः ॥१॥
अस्माकं तु कुले जाता नाना गोत्र समुद्भवाः।
ते सर्वे तृप्तिमायन्तु दण्डसम्बन्धिवारिणा ॥२॥

॥ अथ दंडमुद्रा नमस्कारः ॥

विष्णु हस्ते यथा चक्रं शूलं शिवकरे तथा।
इन्द्रहस्ते यथा वज्रं तथा दंड भवाद्यमे ॥१॥

ॐ तत्सत्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥अथ दिक्पाल नमस्कारः॥

ॐ प्राच्यै दिशे इन्द्राय नमः ॥१॥
ॐ आग्नेय्यै दिशे अग्नये नमः ॥२॥
ॐ अवाच्यै दिशे यमाय नमः ॥३॥
ॐ नैर्ऋत्यै दिशे निर्ऋतये नमः ॥४॥
ॐ प्रतीच्यै दिशे वरुणाय नमः ॥५॥
ॐ वायव्यै दिशे वायवे नमः ॥६॥
ॐ उदीच्यै दिशे सोमाय नमः ॥७॥
ॐ ऐशान्यै दिशे ईशाय नमः ॥८॥
ॐ ऊर्ध्वायै दिशे ब्रह्मणे नमः ॥९॥
ॐ अधःयै दिशे अनन्ताय नमः ॥१०॥

॥अथ संप्रदायाचार्य नमस्कारः॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्म विद्यासंप्रदाय कर्तृभ्यो वंश ऋषिभ्यो महद्भ्यो नमो गुरुभ्यः सर्वेपि प्रवरहितः प्रज्ञान घनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ॥१॥
ॐ नारायणं पद्म भवं वशिष्ठं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शक्तिं च तत्पुत्र पाराशरं च ।
व्यासं शुकं गौड़पदं महान्तं
गोविन्द योगीन्द्र मथास्य शिष्यम् ॥ २॥
श्री शंकराचार्य मथास्य पद्म
पादं च हस्तामलकं च शिष्यम् ।
तं त्रोटकं वार्तिककार मन्यान्
अस्मद्गुरून्संतत मानतोऽस्मि ॥ ३॥
श्रुति स्मृति पुराणाना मालयं करुणा
लयम् । नमामि भगवत्पादम् शंकरम्
लोक शंकरम् ॥ ४॥
शंकरं शंकराचार्यम् केशवं बाद-
रायणम् । सूत्र भाष्य कृतौ वन्दे
भगवन्तौ पुनः पुनः ॥ ५॥
ईश्वरो गुरुरात्मेति मूर्ति भेद विभागिने
व्योमवद् व्याप देहाय दक्षिणामूर्तये नमः ॥ ६॥
ॐ तिष्ठ त्वं देव देवेश तिष्ठ त्वं देवता ।
ऋषिभि मुनिभि र्वायि गंधर्वादि समंसदा ॥ ७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ दशो शान्ति पाठ ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् अवतु वक्तारम् ॥ १ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना वधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः ३ ॥ २ ॥

ॐ यश्छन्दसा मृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सम्बभूव । स मेंद्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय॥
ॐ शान्तिः शान्तिः शान्तिः॥ ३॥
ॐ अहं वृक्षस्य रेरिवा कीर्तिः पृष्ठं गिरेरिव। ऊर्द्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणꣳ सुवर्चसम्। सुमेधा अमृतोऽक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्॥
ॐ शान्तिः शान्तिः शान्तिः॥ ४॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ शान्तिः शान्तिः शान्तिः॥ ५॥
ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च। सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मामा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरतेय उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु॥ ॐ शान्तिः ३॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारमवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ ७॥

ॐ भद्रं नो अपिवातय मनः॥ ॐ शान्तिः शान्तिः शान्तिः ॥८॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः॥ स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः ३॥ ९॥

ॐ यो ब्रह्माणं विदधाति पूर्वं यो वै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्म
बुद्धि प्रकाशं मुमुक्षुर्वै शरण मह प्रपद्ये॥
ॐ शान्तिः शान्तिः शान्तिः॥२०॥

॥ शान्तिपाठ समाप्तः ॥

॥ अथ पंचीकरणम् प्रारंभः ॥

ॐ अथातः परम हंसानाम् समाधिविधिं
व्याख्यास्यामः। सच्छब्द वाच्यमविद्या
शवलं ब्रह्म। ब्रह्मणोऽव्यक्तम्। अव्य-
क्तान्महत्। महतोऽहङ्कारः। अहङ्कारात
पञ्च तन्मात्राणि। पंच तन्मात्रेभ्यः पञ्च
महा भूतानि। पंच महा भूतेभ्योऽखिलं
जगत्। पंचानां भूतानामेकैकं द्विधा
विभज्य स्वार्ध भागं विहायार्ध भागं च-
तुर्धा विभज्य तरेषु योजिते पंचीकरणं
मायारूप मध्यारोपाप वादाभ्यां निष्प्रप-
ञ्चो प्रपञ्च्यते॥ ^ दर्शन

पञ्चीकृत पञ्च महा भूतानि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्कार्यं च सर्वं विराडित्युच्यते। एतत्स्थूल शरीरमात्मनः। इन्द्रियै रर्थोपलब्धि र्जागरितम्। एतदुभयाभिमान्यात्मा विश्व एतत्त्रय मकारः॥

अपञ्चीकृत पंच महाभूतानि पंच तन्मात्रापि। तत्कार्यं च पंच प्राणा दशेन्द्रियाणि मनो बुद्धि श्चेति सप्त दशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते। एतत्सूक्ष्म शरीर मात्मनः। करणेषु प संहृतेषु जागरित संस्कारजः प्रत्ययः स विषयः स्वप्न इत्युच्यते। तदुभयाभिमान्यात्मा तैजस एतत्त्रय मुकारः॥

शरीरद्वय कारण मात्मा ज्ञानं साभासमव्याकृत मित्युच्यते। एतत्कारण शरीर मात्मनः। तच्च न सन्ना सन्नापि सद् सत्। न भिन्नं नाभिन्नं नापि भिन्नाभिन्नं। कुतश्चित्। न निरवयं न सावयवं नोभयम्। किन्तु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केवल ब्रह्मात्मै कत्व ज्ञानापनोद्यं सर्व प्रकार ज्ञानोप संहारे बुद्धेः कारणात्मनावस्थानं सुषुप्तिः। तदुभयाभि मान्यात्मा प्राज्ञ एतत्त्रयं मकारः॥

अकार उकारे। उकारो मकारे। मकार ओङ्कारे। ओङ्कारो ह्यमेव। अहमेवात्मा साक्षी केवल श्चिन्मात्र स्वरूपो ना ज्ञानं नापि तत्कार्यं किन्तु नित्य शुद्ध बुद्ध मुक्त सत्य स्वभावं परमा नन्दाद्वयं प्रत्यग्भूत चैतन्यं ब्रह्मैवाहस्मीत्य भेदानावस्थानं समाधिः॥ तत्त्वमसि॥ प्रज्ञानं ब्रह्म॥ अयमात्मा ब्रह्म॥ अहं ब्रह्मास्मि॥ इत्यादि श्रुतिभ्यः॥ इति पंचीकरणं भवति॥

॥ईशावास्योपनिषद् प्रारंभः॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

ॐ शान्तिः शान्तिः शान्तिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वह (परब्रह्म) पूर्ण है और यह (कार्यब्रह्म) भी पूर्ण है, क्योंकि पूर्ण से पूर्ण की ही उत्पत्ति होती है। तथा [प्रलयकाल में] पूर्ण (कार्यब्रह्म) का पूर्णत्व लेकर (अपने में लीन करके) पूर्ण [परब्रह्म] ही बच रहता है। त्रिविध ताप की शान्ति हो॥

ॐ ईशा वास्य मिदꣳ सर्वं यत्किञ्च। जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्॥१॥

जगत मे जो कुछ स्थावर जंगम संसार है वह सब ईश्वर के द्वारा आच्छादनीय है [अर्थात् उसे भगवत्स्वरूप अनुभव करना चाहिये]। उसके त्याग सें भाव से तू अपना पालन कर; किसी के धन की इच्छा न कर॥१॥

ॐ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इस लोक में कर्म करते हुए ही सौ वर्ष जीने की इच्छा करे। इस प्रकार मनुष्यत्व का अभिमान रखने वाले तेरे लिये इसके सिवा और कोई मार्ग नहीं है, जिससे तुझे [अशुभ] कर्म का लेप न हो ॥२॥

ॐ असुर्या नाम ते लोका अन्धेन तमसा वृताः। ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्म हनो जनाः ॥३॥

वे असुर सम्बंधी लोक आत्मा के अदर्शन रूप अज्ञान से आच्छादित हैं। जो कोई भी आत्मा का हनन करने वाले लोग हैं वे मरने अनन्तर उन्हें प्राप्त होते हैं ॥३॥

ॐ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्। तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

वह आत्मतत्त्व अपने स्वरूप से विचलित न होने वाला, एक तथा मन से भी तीव्र गति वाला है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इसे इन्द्रियाँ प्राप्त नहीं कर सकीं क्योंकि यह उन सबसे पहिले (आगे) गया हुआ (विद्यमान) है। वह स्थिर होने पर भी अन्य सब गतिशीलों को अतिक्रमण कर जाता है। उसके रहते हुये ही [अर्थात् उसकी सत्ता में ही] वायु समस्त प्राणियों के प्रवृत्तिरूप कर्मों का विभाग करता है ॥ ४ ॥

ॐ तदेजति तन्नैजति तद्दूरे तद्वन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

वह आत्म तत्त्व चलता है और नहीं भी चलता। वह दूर है समीप भी है। वह सब के अन्तर्गत है और वही इस सब बाहर भी है ॥ ५ ॥

ॐ यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

जो [साधक] सम्पूर्ण भूतों को आत्मा में ही देखता है और समस्त भूतों में भी आत्मा को ही

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देखता है वह इस [सार्वात्म्यदर्शन] के कारण ही किसीसे घृणा नहीं करता ॥६॥

ॐ यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥७॥

जिस समय ज्ञानी पुरुष के लिये सब भूत आत्मा ही हो गये उस समय एकत्व देखने वाले उस विद्वान को क्या शोक और क्या मोह हो सकता है॥७॥

ॐ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥८॥

वह आत्मा सर्वगत शुद्ध अशरीरी, अक्षत, स्नायु से रहित निर्मल अपापहत, द्रष्टा, सर्वज्ञ, सर्वोत्कृष्ट और स्वयम्भू (स्वयं ही होने वाला) है। उसीने नित्य सिद्ध संवत्सर नामक प्रजापतियों के लिये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा योग्य रीति से (कर्त्तव्यों अथवा पदार्थों) का विभाग किया है ॥ ८ ॥

ॐ अन्धन्तमः प्रविशन्ति येऽबिद्या मुपासते। ततो भूय इव ते तमो य उ बिद्याया ꣳ रताः ॥ ९ ॥

जो अविद्या (कर्म) की उपासना करते हैं [अविद्यारूप] घोर अन्धकार में प्रवेश करते हैं और जो बिद्या (उपासना) में ही रत है वे मानो उससे भी अधिक अन्धकार में प्रवेश करते हैं ॥ ९ ॥

ॐ अन्य देवा हुर्विद्याया न्यदाहुर विद्यया। इति शुश्रुम धीराणां ये नस्तद्विच चक्षिरे ॥ १० ॥

विद्या (देवता ज्ञान) से और ही फल बतलाया गया है तथा अविद्या (कर्म) से और ही फल बतलाया है। ऐसा हमने बुद्धिमान् पुरुषों से सुना है, जिन्होने हमारे प्रति उसकी व्याख्या की थी ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह। अविद्यया मृत्युं तीर्त्वा विद्यया ऽमृतमश्नुते ॥ ११॥

जो विद्या और अविद्या-इन दोनों को ही एक साथ जानता है वह अविद्या से मृत्यु को पार करके विद्या से अमरत्व प्राप्त कर लेता है ॥ ११॥

ॐ अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते। ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२॥

जो असम्भूति (अव्यक्त प्रकृति) की उपासना करते हैं वे घोर अन्धकार में प्रवेश करते हैं और जो सम्भूति (कार्य ब्रह्म) में रत हैं वे मानो उनसे भी अधिक अन्धकार में प्रवेश करते हैं ॥ १२॥

ॐ अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३॥

कार्य ब्रह्म की उपासना से और ही फल बतलाया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गया है; तथा अव्यक्त की उपासना से और ही फल बतलाया है। ऐसा हमने बुद्धिमानों से सुना है, जिन्होंने हमारे प्रति उसकी व्याख्या की थी ॥ १३ ॥

ॐ सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह। विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥ १४ ॥

जो असम्भूति और कार्य ब्रह्म - इन दोनों का साथ - साथ जानता है वह कार्य ब्रह्म की उपासना से मृत्यु को पार करके असम्भूति के द्वारा [प्रकृति लय रूप] अमरत्व प्राप्त कर लेता है ॥ १४ ॥

ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

आदित्यमण्डस्थ ब्रह्म का मुख ज्योतिर्मय पात्र से ढका हुआ है। हे पूषन्! मुझ सत्य धर्मा को आत्मा की उपलब्धि कराने के लिये तू उसे उघाड़ दे ॥ १५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह। तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥१६॥

हे जगत्पोषक सूर्य! हे यम एकाकी गमन करने वाले! हे यम (संसार का नियमन करने वाले)! हे सूर्य (प्राण और रस को शोषण करने वाले)! हे प्रजापतिनन्दन! तू अपनी किरणों को हटा ले (अपने तेज को समेट ले)। तेरा जो अतिशय कल्याणमय रूप है उसे मैं देखता हूँ। यह जो आदित्य मण्डलस्थ पुरुष वह मैं हूँ ॥१६॥

ॐ वायुरनिलममृत मथेदं भस्मान्त ँ शरीरम्। ॐ क्रतो स्मर कृत ँ स्मर क्रतो स्मर कृत ँ स्मर ॥१७॥

अब मेरा प्राण सर्वात्मक वायु रूप सूत्रात्मा को प्राप्त हो और यह शरीर भस्म शेष हो जाय। हे मेरे संकल्पात्मक मन! अब तू स्मरण कर अपने किये हुए

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

को स्मरण कर ॥१७॥

ॐ अग्ने नय सुपथा राये अस्मा-
न्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयि-
ष्ठां ते नम उक्तिं विधेम ॥१८॥

हे अग्ने! हमें कर्मफल भोग के लिये सन्मार्ग से ले चल। हे देव! तू समस्त ज्ञान और कर्मों को जानने वाला है। हमारे पाषण्ड पूर्ण पापों को नष्ट कर। हम तेरे लिये अनेकों नमस्कार करते हैं ॥१८॥

इति श्री ईशावास्योपनिषद्
सम्पूर्णम्।

हरिः ॐ तत्सत्

ॐ पूर्णमदः पूर्णमिदं।
पूर्णात्पूर्णमुदच्यते ॥
पूर्णस्य पूर्णमादाय।
पूर्णमेवावशिष्यते ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ अथ माण्डूक्योपनिषद् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हे देवगण हम कानोंसे कल्याणमय बचन सुनें। यज्ञकर्म में समर्थ होकर नेत्रोंसे शुभ दर्शन करें तथा अपने स्थिर अंग और शरीरोंसे स्तुति करनेवाले हम लोग देवताओं के लिये हितकर आयुका भोग करें॥ महान् कीर्तिमान् इन्द्र हमारा कल्याण करे परम ज्ञानवान् [अथवा परम धनवान्] पूषा हमारा कल्याण करें जो अरिष्टों (आपत्तियों) के लिये चक्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केसमान [घातक] हैं वह गरुड़ हमारा कल्याण करें तथा बृहस्पतिजी हमारा कल्याण करें, त्रिविध ताप शान्ति हो ॥ १॥

ॐ ओमित्येतदक्षरमिदꣳ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ १॥

ॐ यह अक्षर ही सब कुछ है। यह जो कुछ भूत भविष्यत् और वर्तमान है उसीकी व्याख्या है; इसलिये यह सब ओंकार ही है। इसके सिवा जो अन्य त्रिकालातीत वस्तु है वह भी ओंकार ही है ॥ १॥

ॐ सर्वꣳ ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥ २॥

यह सब ब्रह्म ही है। यह आत्मा ही ब्रह्म है। वह यह आत्मा चार पदों (अंशों) वाला है ॥ २॥

ॐ जागरितस्थानो बहिष्प्रज्ञः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्ताङ्ग एकोनविंशति मुखः स्थूल भुग्वैश्वानरः प्रथमः पादः ॥३॥

जाग्रत अवस्था जिस (की अभिव्यक्ति) का स्थान है, जो बहिः प्रज्ञ (बाह्य विषयों को प्रकाशित करने वाला) सात अंगों वाला, उन्नीस मुखों वाला और स्थूल विषयों का भोक्ता है वह वैश्वानर पहला पाद है ॥३॥

ॐ स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताङ्ग एकोनविंशति मुखः प्रविविक्त भुक्तैजसो द्वितीयः पादः ॥४॥

स्वप्न जिसका स्थान है तथा जो अन्तः प्रज्ञ सात अंगों वाला, उन्नीस मुख वाला और सूक्ष्म विषयों भोक्ता है वह तैजस। इसका दूसरा पाद है ॥४॥

ॐ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्यानन्द भुक्चेतो मुखः प्राज्ञस्तृतीयः पादः ॥५॥

जिस अवस्था में सोया हुआ पुरुष किसी भोग की इच्छा नहीं करता और न कोई स्वप्न ही देखता है उसे सुषुप्ति कहते हैं। वह सुषुप्ति जिसका स्थान है तथा जो एकीभूत प्रकृष्ट ज्ञानस्वरूप होता हुआ ही आनन्दमय, आनन्द भोक्ता और चेतनारूप मुख वाला वह प्राज्ञ ही तीसरा पाद है ॥५॥

ॐ एष सर्वेश्वर एष सर्वज्ञः एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

यह सब का ईश्वर है यह सर्वज्ञ है, यह अन्तर्यामी है और समस्त जीवों की उत्पत्ति तथा लय का स्थान होने के कारण यह सब का कारण भी है ॥६॥

ॐ नान्तः प्रज्ञं न बहिष्प्रज्ञं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं
नाप्रज्ञम् । अदृष्टमव्यवहार्यम-
ग्राह्यमलक्षणमचिन्त्यमव्यप-
देश्यमेकात्मप्रत्ययसारं प्रप-
ञ्चोपशमं शान्तं शिवमद्वैतं च-
तुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥७॥

[विवेकी जन] तुरीय को ऐसा मानते हैं कि व-
ह न अन्तः प्रज्ञ है, न बहिष्प्रज्ञ है, उभयतः (अ-
न्तर्बहिः) प्रज्ञ है न प्रज्ञानघन है न प्रज्ञ है, और
न अप्रज्ञ है। बल्कि अदृष्ट, अव्यवहार्य, अग्रा-
ह्य, अलक्षण, अचिन्त्य, अव्यपदेश्य, एका-
त्म प्रत्ययसार, प्रपञ्च का उपशम, शान्त शिव
और अद्वैतरूप है। वही आत्मा है और वही
साक्षात् जानने योग्य है ॥ ७ ॥

ॐ सोऽयमात्माध्यक्षरमो-
ङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च
पादा अकार उकारो मकार इति ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वह यह आत्मा अक्षर दृष्टि से ओंकार है, वह मात्राओं को विषय करके स्थित है। पाद ही मात्रा है और मात्रा ही पाद है; वे मात्रा अकार, उकार और मकार हैं ॥८॥

ॐ जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा प्राप्तेरादिमत्त्वाद्वा प्राप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥८॥

जिसका जागरित स्थान है वह वैश्वानर व्याप्ति और आदि मत्त्व के कारण [ओंकार की] पहिली मात्रा अकार है। जो उपासक इस प्रकार जानता है वह सम्पूर्ण कामनाओं को प्राप्त कर लेता है और [महापुरुषों में] आदि (प्रधान) होता है ॥८॥

ॐ स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वप्न जिसका स्थान है व तैजस मध्य वर्तित्व के कारण ओंकार की द्वितीय मात्रा उकार है जो उपासक ऐसा जानता है वह अपनी ज्ञान सन्तान का उत्कर्ष करता है सब के प्रति समान होता है और उसके वंश में कोई ब्रह्म ज्ञान हीन पुरुष नहीं होता ॥१९॥

ॐ सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥२०॥

सुषुप्ति जिसका स्थान है वह प्राज्ञ मान और लय के कारण ओंकार की तीसरी मात्रा मकार है। जो उपासक ऐसा जानता है वह इस सम्पूर्ण जगत् का मान प्रमाण कर लेता है और उसका लय स्थान हो जाता है ॥२०॥

ॐ अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मानं य एवं वेद ॥१२॥

मात्रारहित ओंकार तुरीय आत्मा ही है। वह अव्यवहार्य, प्रपञ्चोपशम, शिव और अद्वैत है। इस प्रकार ओंकार आत्मा ही है। जो उसे इस प्रकार जानता है वह स्वतः अपने आत्मा में ही प्रवेश कर जाता है ॥१२॥

॥ इति श्रीमाण्डूक्योपनिषद् सम्पूर्णम् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥१॥ ॐ शान्तिः शान्तिः शान्तिः॥ स्वस्ति नः पूषा विश्ववेदाः॥

हरिः ॐ तत्सत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ प्रणवमहात्म्यम् ॥

ॐ ओंकारं पादशो विद्यात्पादा मात्रा न संशयः। ओङ्कारं पादशो ज्ञात्वा न किंचिदपि चिन्तयेत् ॥१॥

ॐ युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्। प्रणवे नित्य युक्तस्य न भयं विद्यते क्वचित् ॥२॥

ॐ प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः। अपूर्वोऽनन्तरोऽबाह्योऽन परः प्रणवोऽव्ययः ॥३॥

ॐ सर्वस्य प्रणवो ह्यादिर्मध्य मन्तस्तथैव च। एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥४॥

ॐ प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम्। सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥५॥

ॐ अमात्रोऽनन्तमात्रश्च द्वैतस्यो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पशामः शिवः। ओङ्कारं विदितो येन स मुनिर्नेतरो जनः ॥६॥

॥ इति प्रणव महात्म समाप्तम् ॥

॥ अथ सप्तश्लोकी गीता प्रारंभः ॥

ॐ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१॥

ॐ स्थाने हृषीकेश तव प्रकीर्त्या।
जगत्प्रहृष्य त्यनुरज्यते च ॥
रक्षांसि भीतानि दिशो द्रवन्ति।
सर्वे नमस्यन्ति च सिद्धसंघाः ॥२॥

सर्वतः पाणि पादं तत्सर्वतोऽक्षिरोमुखम्।
सर्वतः श्रुति मल्लोके सर्वमावृत्य तिष्ठति ॥३॥

ॐ कविं पुराण मनुशासितार-।
मणोरणीयां समनुस्मरेद्यः ॥
सर्वस्य धातार मचिन्त्य रूप-।
मादित्य वर्णं तमसः परस्तात् ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥५॥
ॐ सर्वस्य चाहं हृदि संनविष्टो ।
मत्तः स्मृतिर्ज्ञानमपोहनं च ॥
वेदैश्च सर्वैरहमेव वेद्यो ।
वेदान्तकृद्वेदविदेव चाहम् ॥६॥
ॐ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥७॥
ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन
संवादे सप्तश्लोकी गीता सम्पूर्णम् ॥

॥ अथ गौरीशाष्टकम् प्रारंभः ॥

भज गौरीशं भज गौरीशं गौरीशं भज मन्द मते ।
जड़भव दुस्तर जलधिसुतरणं ध्येयं चित्ते शिव हर
चरणम् । अन्योपायो नहि नहि सत्यं गेयं शंकर शंकर
नित्यम् ॥ भज गौरीशं भज गौरीशं गौरीशं भज मन्दमते ॥१॥
दारापत्यं क्षेत्रं वित्तं देहं गेहं सर्वमनित्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिपरिभावय सर्वासारं गर्भ विकृत्या स्वप्न विचार-
म्॥ भज गौरीशं भज गौरीशं गौरीशं भज मन्द मते॥२॥
मलवै चित्ते पुनरः वृत्तिः पुन रपि जननी जठरोत्पत्तिः।
पुन रप्याशा कुलितं जठरं किं नहि मुंचसि कथमें चित्त-
म्॥ भज गौरीशं २ गौरीशं भज मन्द मते॥ ३॥
माया कल्पित मैन्द्रं जालं नहि तत्सत्यं दृष्टि विकार-
म्। ज्ञाते तत्त्वे सर्वमसारं माकुरु माकुरु विषय वि-
चारम्॥ भज गौरीशं २ गौरीशं भज मन्द मते॥४॥
रज्जौ सर्प भ्रमणा रोपस्तद्वद ब्रह्मणि जगदा रोपा।
मिथ्या माया मोह विकारं मनसि विचारय बारं बारम्॥
भज गौरीशं २ गौरीशं भज मन्द मते॥५॥
अध्वर कोटी गंगा गमनं कुरुते योगं चेन्द्रिय दमन-
म्। ज्ञान विहीने सर्व मतेन न भवति मुक्ति जन्म श-
तेन॥ भज गौरीशं २ गौरीशं भज मन्द मते॥६॥
सोहं हंसो ब्रह्मो वाहं शुद्धा नन्दस्तत्व परोहम्।
अद्वैतोहं संग विहीने चेन्द्रिय आत्मन्यखिने नी-
ले॥ भज गौरीशं २ गौरीशं भज मन्द मते॥७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शंकर किंकर माकुरु चिन्तां न्ता मणि ना विरचितमेत-
त्। यह सद् भक्त्या पठतिहि नित्यं ब्रह्मणि लीनो भव-
तिहि सत्यम् ॥ भज गौरीशं २ गौरीशं भज मन्द मते ॥ ८ ॥

॥ इति श्री गौरीशाष्टकम् सम्पूर्णम् ॥

॥ देव्यपराधक्षमापनस्तोत्रम् प्रारंभः ॥

न मंत्रं नो यंत्रं तदपि च न जाने स्तुति महो ,
न चाह्वानं ध्यानं तदपि च न जाने स्तुति कथा ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं ,
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥
विधेरज्ञानेन द्रविण विरहेणा लसतया ,
विधेया शक्यत्वात्तव चरण योर्या च्युतिरभूत ।
तदेतत्क्षंतव्यं जननि सकलोद्धारिणि शिवे ,
कुपुत्रो जायेत क्वचि दपि कुमाता न भवति ॥ २ ॥
पृथिव्यां पुत्रास्ते जननि बहवः संति सरलाः ,
परं तेषां मध्ये विरलतरलो ऽहं तव सुतः ।
मदीयो ऽयं त्यागः समुचित मिदं नो तव शिवे ,
कुपुत्रो जायेत क्वचि दपि कुमाता न भवति ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगन्मातर्मातस्तव चरण सेवा न रचिता ,
नवा दत्तं देवि द्रविण मपि भूयस्तव मया ।
तथाऽपि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे ,
कुपुत्रो जायेत क्वचि दपि कुमाता न भवति ॥४॥
परित्यक्त्वा देवान्विविध विधि सेवाकुलतया ,
मयापंचाशीते रधिकमपि नीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता ,
निरालंबो लंबोदर जननि कंयामि शरणम् ॥५॥
श्वपाको जल्पाको भवति मधु पाको पम गिरा ,
निरातंको रंको विहरति चिरं कोटि कनकैः ।
तवापर्णे कर्णे विशति मनु वर्णे फल मिदं ,
जनः को जानीते जननि जपनीयं जप विधौ ॥६॥
चिता भस्मा लेपो गरल मशनं दिक्पट धरो ,
जटाधारी कंठे भुजग पति हारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैक पदवीं ,
भवानि त्वत्पाणि ग्रहण परि पाटीफल मिदम् ॥७॥
न मोक्षस्याकांक्षा न च विभव वांछाऽपि च न मे ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न विद्याना पेक्षा शशि मुखि सुखेच्छाऽपि न हि कः पुनः।
अतस्त्वां संयाचे जननि जननं यातु ममवै ,
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥

नराधिताऽसि विधिना विविधोप चारैः ,
किं रूक्ष चिंतन परै र्नवचोभिः कृतं --- ।
श्यामे त्वमेव यदि किंचन मय्य नाथे ,
धत्से कृपा मुचित मंब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्व दीयं ----- ,
करोमि दुर्गे करुणार्ण वेशि ----- ।
नै तच्छठत्वं माम भाव येथाः ---- ,
क्षुधा तृषार्ता जननीं स्मरंति ---॥१०॥

जगदंब विचित्र मत्र किं, परि पूर्णा करुणाऽस्ति चेन्मयि।
अपराध परं परा वृतं , नहि माता समुपेक्षते सुतम्॥११॥

मत्समः पातकी नास्ति , पापघ्नी त्वत्समा नहि ---।
एवं ज्ञात्वा महादेवि, यथा योग्यं तथा कुरु॥१२॥

॥ इति देव्यपराधक्षमापनस्तोत्रम् ॥

॥ सम्पूर्णम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ फुटकर श्लोक प्रारंभः ॥

ॐ नित्यो नित्यानां चेतनश्चेतनानाम्, एको यो विदधाति कामान् । तत कारणं सांख्य योगाधिगम्यं, ज्ञात्वा देवं मुच्यते सर्व पाशैः ॥१॥

अजं शाश्वतं कारणं कारणानां, शिवं केवलं भासकं भासकानाम् । तुरीयं तमः पार माद्यन्त हीनं, प्रपद्ये परं पावनं द्वैत हीनम् ॥२॥

नारायणोऽहं नरकान्त कोऽहं,
पुरान्त कोऽहं पुरुषो ह्यमीशः ।
मखन्ड बोधोऽह मशेष साक्षी,
निरीसरोऽहं निरहञ्च निर्मम ॥३॥

तावत् गर्जन्ति शास्त्राणि, जम्बुका विपिने यथा । न गर्जति महा शक्ति यावत वेदान्त केसरी ॥४॥

नृदेह माद्यं सुलभं सु दुर्लभं, प्लवं सुकल्पं गुरु कर्ण धारम् । मयानुकूलेन नभस्वतेरितं, पमान्भवाब्धिं न तरेत्स आत्महा ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ गणपतिस्तोत्रम् प्रारंभः ॥

ॐ प्रणम्य शिरसा देवं गौरी पुत्र विनायकं ।
भक्त्या च संस्मरेत् नित्यं आयुकामार्थसिद्धये ॥१॥
लम्बोदरं प्रथमं वक्रतुण्डं च एकदंतं द्वितीयकं ।
तृतीयं कृष्णपिङ्गाक्षं चतुर्थं गजवक्रकं ॥२॥
लम्बोदरं पंचमं च षष्ठं विकटमेव च - - - ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाऽष्टमम् ॥३॥
नवमं भालचन्द्रं च दशमं तु विनायकं - - ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥४॥
एतानि द्वादश नामानि त्रिसंध्यं यः पठेत् नरः ।
ऋणं न जायते तस्य धनं शीघ्रं मापु यात ॥५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनं ।
पुत्रार्थी लभते पुत्रं मोक्षार्थी लभते गतिम् ॥६॥
सम्वत् शरेण सिद्धिं च लभते नात्र संशयः ।
यः पठेत् गणपतिं स्तोत्रं षड्भिर्मासैः फलं लभेत् ॥७॥
अष्टानां ब्राह्मणानां च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत् सद्यो गणेशस्य प्रसादतः ॥८॥

॥ समाप्तम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ आत्म ~~ब्रह्म~~ चिन्तनम् प्रारंभः ॥

अहमेव परं ब्रह्म वासुदेवाख्य मव्ययम् ।
इति स्यान्निश्चितो मुक्तो एवान्यथा भवेत् ॥१॥
अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येवं समुपासीत ब्रह्मणो ब्रह्मणि स्थितः ॥२॥
अहमेव परं ब्रह्म निश्चितं चित्त चिंत्यताम् ।
चिद्रूपत्वादसंगत्वादबाध्यत्वात्प्रयत्नतः ॥३॥
सर्वोपाधि विनिर्मुक्तं चैतन्यं च निरंतरम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥४॥
अहं ब्रह्मास्मि यो वेद स सर्वं भवति त्विदम् ।
नाभूत्याईशते देवास्तस्यात्मैषां भवेद्धि सः ॥५॥
अन्योसावहमन्योस्मीत्युपास्ते योन्यदेवताः
न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥६॥
अहं देवो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानंदरूपोहं निर्विकल्प स्वभावन् ॥७॥
आत्मानं सततं ब्रह्म संभाव्य विहरंति ये ।
न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मानं सततं ब्रह्म संभाव्य विहरेत्सुखम् ।
संसारे गतसारे यस्तस्य दुःखं न जायते ॥ ९॥
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिंतनम् ।
स महापातकं हन्यात्तमः सूर्योदयो यथा ॥१०॥
अज्ञानाद्ब्रह्मणो जातं कणं बुद्बुदोपमम् ।
आकाशाद्वायुरुत्पन्नो वायोस्तेजस्ततः पयः ।
अंभसः पृथिवी जाता ततो ब्रीहियवादिकम् ॥११॥
पृथिव्यप्सु पयो वन्हौ वन्हिर्वायौ नभस्यसौ ।
नभोप्यव्याकृते तच्च शुद्धे शुद्धोऽस्म्यहं हरिः ॥१२॥
अच्युतोहमनंतोहं गोविंदोहमहं हरिः ।
आनंदोहमशेषोहमजोहममृतोस्म्यहम् ॥१३॥
नित्योहं निर्विकल्पोहं निराकारोहमव्ययः ।
~~कर्तृ भोक्तादिकं~~ सच्चिदानंदसंदोहः परमोस्म्यहं सदा ॥१४॥
ब्रह्मैवाहं न संसारी मुक्तोहमिति भावयेत् ।
अशक्नुवन्भावयितुं वाक्यमेतत्सदाभ्यसेत् ॥१५॥
अहं विष्णुरहं विष्णुरहं च विष्णुरहं हरिः ।
कर्तृ भोक्त्रादिकं सर्वं तदविद्योत्थमेव च ॥१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यानयोगेनैकमासाद्ब्रह्महत्यां व्यपोहति ।
षण्मासाभ्यासयोगेन सर्वं पापं व्यपोहति ॥ १७ ॥
संवत्सरकृताभ्यासात्सिद्ध्यष्टमवाप्नुयात् ।
यावज्जीवं सदाभ्यासाज्जीवन्मुक्तो न संशयः ॥ १८ ॥
नाहं देहो न च प्राणो नेंद्रियाणि तथैव च ।
न मनोहं न बुद्धिश्च नैव चित्तमहं कृतिः ॥ १९ ॥
नाहं पृथ्वी न सलिलं न च वह्निस्तथानिलः ।
न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ॥ २० ॥
नाहं गंधो न रूपं च न माया हं न संसृतिः ॥
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलम् ॥ २१ ॥
अकर्ताहमभोक्ताहमसंगः परमेश्वरः ।
सदा मत्सन्निधानेन चेष्टते सर्वमिंद्रियम् ॥ २२ ॥
आदिमध्यांतमुक्तोहं न बुद्धोहं कदाचन ।
स्वभाव निर्मलः शुद्धः स एवाहं न संशयः ॥ २३ ॥
सर्वज्ञोहमनंतोहं सर्वगः सर्वशक्तिमान् ।
आनंदः सत्यबोधोहमिति ब्रह्मानुचिंतनम् ॥ २४ ॥
अयं प्रपंचो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्र प्रमाणं वेदांता गुरवोनुभवस्तथा ॥२५॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥२६॥
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ।
नाहं देहो न मे देहः केवलोहं सनातनः ॥२७॥
॥इति श्रीमदात्मचिंतनसंपूर्णम् ॥

॥अथ श्रीगुरु आरति प्रारंभः ॥
जय गुरु देव दया निधि दीनन हितकारी ।
जय जय मोह विनाशक भव बंधन हारी ॥
जय देव गुरु देव ॥१॥
ब्रह्मा विष्णु सदाशिव गुरु मूरति धारी ।
बेद पुराण बखानत गुरु महिमा भारी ॥ जय० ॥२॥
जप तप तीरथ संयम दान बिबिध दीने ।
गुरु बिन ज्ञान न होवै कोटि जतन कीने ॥ जय० ॥३॥
मायामोह नदी जल जीव नहिं सारे
नाम जहाज बिठाकर गुरु पल में तारे ॥ जय० ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काम क्रोध मद मत्सर चोर बड़े भारे ।
ज्ञान खड्ग दे कर गुरु सब संहारे ॥ जय० ॥५॥
नाना पंथ पंथ जगत में निज निज गुण गावें ।
सब का सार बताकर गुरु मारग लावे ॥ जय० ॥६॥
गुरु चरणामृत निर्मल सब पातक हारी ।
बचन सुनत तम नाशे सब संशय टारी ॥ ज० ॥७॥
तन मन धन सब अर्पण गुरु चरण न कीजे ।
ब्रह्मानन्द परम पद मोक्ष गती लीजे ॥ ज० ॥८॥
॥ इति गुरु आरति समाप्त ॥

ॐ सर्पापसर्प भद्रं ते गच्छ सर्प महा
विष ॥ जनमेजयस्य यज्ञान्ते आ
स्तीक वचनं स्मर ॥१॥ आस्तीक
स्य वचः श्रुत्वा यः सर्पो न निवर्त
ते ॥ शतधा भिद्यते मूर्ध्नि शिंश
वृक्ष फलं यथा ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राम

१ रा २ म

सुनि राम सब कोइ कहै दशरथ कहै न
कोय। एक बेर दसरथ कहै कोटि जज्ञ
फल होय॥

रमहाँ सब जेहि जपत महेस काशी
मुक्ति योनु उपदेस॥

दसरथ = पाँच ज्ञान इन्द्रिय पाँच कर्म
इन्द्रिय॥

उपदेश = आधा तो ब्रह्म जिज्ञासा
इन्द्रिय बस करने की दवा - सूँघी गाय
कतउ कोइ नाहीं

इच्छा करै = कि मैं ब्रह्म होऊँ

भव भेदी = संसार नास

मैं ब्रह्म होऊँ = हो गया

जेहि जानहु तेहि देऊ जनाई जानत
तुम्हहिं तुम्हहिं होइ जाई॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सतम

तथ एवैनं ब्रह्मलोकं ब्रह्मचर्यं
न विन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेष
लोकेषु कामचारो भवति
सत्येन लभ्यस्तपसह्येष आत्मा सम्यग्ज्ञा
ब्रह्मचर्येण नित्यम
न तपस्तप इत्याहुर्ब्रह्मचर्यं तपोत्तमम
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः

ॐ मेरुमण्डलतुल्यानि यानि पापानि
मस्तकोत्थकेशानाश्रित्य तिष्ठन्ति त
स्मात्केशान्वपाम्यहम॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रामेश्वरा होगयो रामेश्वरा होगयो रामेश्वरा हूँ

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्
उपागम्याब्रवीद्राममगस्त्यो भगवांस्तदा
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन्वत्स समरे विजयिष्यसि
आदित्य हृदयं पुण्यं सर्वशत्रुविनाशनम्
जयावहं जपन्नित्यमक्षय्यं परमं शिवम्
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ।
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः
एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ९
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः १०
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंशुमान् ११
हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः
अग्निगर्भो दितेः पुत्रः शङ्खः शिशिरनाशनः १२
व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः १३
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः १४
नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते १५
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः
जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः १६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमउग्रायवीराय सारङ्गाय नमोनमः ।
नमः पद्मप्रबोधाय मार्तण्डाय नमोनमः ॥ १८
ब्रह्मशक्राच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वतेसर्वभक्षाय रौद्रायवपुषे नमः ॥ १९
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषांपतये नमः ॥ २०
तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥
नाशयत्येष वै भूतं तमेवसृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रञ्च फलञ्चैवाग्निहोत्रिणाम् ॥
देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥
एनमापदसु कृच्छ्रेषु कान्तारेषु भयेषु च ।
[illegible] च कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्मिन्क्षणे महाबाहो रावणं त्वं हनिष्यसि ।
एवमुक्त्वा ततोऽङ्गीरसो जगाम सह यथागतम् २
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २२
प्राप्तिं त्वं चैव जप्त्वेदं परं हर्षमवाप्तवान् ।
निरस्य चर्म शुचिर्भूत्वा धनुरादाय वीर्यवान्
रावणं चैव दृष्ट्वा स यार्थं समुपागमत् ।
अभिप्रयत्नेन महता वध्यं तस्य धृतोऽभवत् ३
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं
प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्य
गतो वचस्त्वरेति ॥ ३१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आप्रनन्ति चैनं परमेश्वर

मस्मिन्मूर्धचुबुकान्तराले

आवालाः।

य एषोऽन्तोऽव्यक्तआत्मा

सोविमुक्ते प्रतिष्ठित इति।

सोऽविमुक्तः कस्मिन्प्रतिष्ठि

वरणायां नास्यां च मध्ये प्र

ष्ठित इति। का वै वरणा का

नासीति। तच्च वेदमेव

नासिकां वरणा नासीति

निहत्य च सर्वाणीन्द्रियकृतानि

पापानि वारयतीति सा वरणा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवात्मान्द्रयकृतानयोयान
नाश्रयतीति सानास्तीति पुनरा
मनन्ति - कतमद्धास्यस्थानं
भवतीति। भ्रुवोर्घ्राणस्य च यः
संन्धि सूरेवधूलोकस्य परस्य
असंधिर्भवतीति (नारायण)

तस्माद्रुपन्नायरमेश्वरे
दोदृशामात्रिका श्रुतिः।
अभिविमानश्रुतिः प्रत्यगात्मा
या अभिप्राया।
प्रत्यगात्मया सर्वैः प्राणैर्भर
विभीयत इत्यभिविमानः
अभिगतो वायं प्रत्यगात्मत्वा
द्विमानश्च मानविषयेगाद्
इत्यभिमानः। अभिविभिमीते
वा सर्वैर्जगत्कारणत्वा
दिति विमानः। तस्मात्पर
मात्मनो वैश्वानरः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यमिह कारुणिकं शरणं गतो, व्यपि
सहोदर, प्राप महत्पदम् ।
तमह माशु हरिं परमाश्रये —
जनक जाङ्क मनन्त सुखाकृतिम्

श्रीमोयी सकलार्थदं निजपदा
म्भोजेन मुक्तिप्रदं प्रोद्दं विघ्न
वनं हरन्तमनघं श्रीढुण्ढिराजं

वन्दे चर्मकपालिकोप करणं
नैर्ग्यसौख्यात्मकं नास्तीहि
प्रदिशन्तमन्त विधुं श्रीकाशिकेश
शिवम् ॥ २ ॥
यत्कृपा लवमात्रेण मूको भवति
पंडितः । वेद शास्त्र शतीर्ते तां
वाणीं वीणावरामजे ॥ ३

वैद्यनाथः इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

ॐ मोदविनायकाय नमः १
ॐ प्रमोदविनायकाय नमः २
ॐ सुमुखविनायकाय नमः ३
ॐ दुर्मुखविनायकाय नमः ४
ॐ गणनाथविनायकाय नमः ५

अत्यन्तमलिनो देहो देही चात्यन्त
निर्मलः। उभयोरन्तरं ज्ञात्वा
कस्य शौचविधीयते ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कामाष्टमीदत्त दुग्धप्रचुरसुरनुत-
प्राज्ञ मोज्या मोज्याधिपूज्य श्री
गौरीनायकाभिधकटनिधिव-
रामार्थलब्धात्मबोधैः ।
श्रीमद्गोपालगीर्भिः प्रकटित-
परमाद्वैतमासास्मितास्य श्री-
मद्गोविन्दवाणी चरणकमल-
मो निर्मितोऽहं यथामति: ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गारुड़ीमंत्र

- नर्मदाय नमः प्रातर्नर्मदायेनमे
- निशि नमोऽस्तु नर्मदे तुभ्यं
- प्रातिमां विषः सर्पतः सर्पाय
सर्प भद्रन्ते दूरं गच्छ महाविष
जनमेजयस्य यज्ञान्ते आस्तीक
वचनं स्मर। आस्तीक वचन
स्मृत्वा यः सर्पो न निवर्तते
- सतधा भिद्यते मूर्ध्नि वृक्ष
फलं यथा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Google